## राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः । (११४/२८६५)

[1]राजसूय सूर्य मृषोद्य रुच्य कुप्य कृष्टपच्य अव्यथ्य [2]इत्येते शब्दाः क्यपि निपात्यन्ते । राज्ञा सोतव्यः, राजा वा इह सूयते राजसूयः क्रतुः । सूसर्तिभ्यां क्यप्, सर्तेरुत्वं, सुवतेर्वा [3]रुडागमः । सरति सुवति वा सूर्यः । मृषापूर्वस्य वदतेः पक्षे यति प्राप्ते नित्यं [4]क्यब् निपात्यते । [5]मृषापूर्वस्य मृषोद्यम् । रोचतेऽसौ रुच्यः । [6]कर्तरि क्यप् । गुपेरादेः कत्वं च सञ्ज्ञायाम्[7] । कुप्यम् । गोप्यम् अन्यत् । कृष्टे पच्यन्ते कृष्टपच्याः[8] । कर्मकर्तरि निपातनम् । न व्यथते [9]अव्यथ्यः ॥

## भिद्योद्ध्यौ नदे । (११५/२८६६)

भिदेरु[10]ज्झेश्च क्यप् निपात्यते नदेऽभिधेये । उज्झेर्धत्वं च । भिनत्ति कूलं[11] भिद्यः । उज्झति उदकम्[12] उद्ध्यः । नदे इति किम् ? भेत्ता । उज्झिता[13] ॥

## पुष्यसिद्ध्यौ नक्षत्रे । (११६/२८६७)

[14]पुषेः सिधेश्चाधिकरणे क्यप् निपात्यते नक्षत्रे अभिधेये । पुष्यन्ति अस्मिन्नर्थाः इति पुष्यः । सिध्यन्ति[15] अस्मिन्निति सिद्ध्यः । नक्षत्रे इति किम् ? पोषणम् । सेधनम् ॥

## विपूयविनीयजित्या मुञ्जकल्कहलिषु । (११७/२८६८)

विपूय विनीय जित्य इत्येते शब्दा निपात्यन्ते यथासङ्ख्यं मुञ्ज कल्क [16]हलि इत्येतेषु अर्थेषु बोध्येषु । विपूर्वात् पवतेर्नयतेश्च [17]तथा जयतेर्यति प्राप्ते (३.१.९७/२८४२) कर्मणि क्यब् निपात्यते । विपूयो मुञ्जः । विपाव्यम् अन्यत् । विनीयः कल्कः । विनेयम् अन्यत् । जित्यो हलिः । जेयम् अन्यत् ॥

## प्रत्यपिभ्यां ग्रहेश्छन्दसि । (११८/२८६९)

प्रति अपि इत्येवंपूर्वाद् ग्रहेः क्यप् प्रत्ययो भवति छन्दसि विषये । 'मत्तस्य न प्रतिगृह्यम् (अनृतम्)' (का. सं. १४.५) । '[18]तस्मान्नापिगृह्यम्' (का. सं. २७. ३) । छन्दसि इति किम् ? प्रतिग्राह्यम् । अपिग्राह्यम् (३. १. १२४/२८७२) ॥

---

1. राजसूयादिशब्दाः क्यबन्ताः फ. 2. इति क्यप्प्रत्ययान्ताः अ, इत्येतेभ्यः क्यप् निपात्यते । राजशब्दे तृतीयान्ते प्रथमान्ते वा उपपदे सुनोतेः क्यप् ड. 3. रुगागमः अ. 4. क्यब् नास्ति ब. 5. °पूर्वात् अ,मृषाशब्दात् ड. 6. कर्तरि क्यप् नास्ति अ. फ. 7. वक्तव्यम् इत्यधिकम् फ. ह. 8. शालयः इत्यधिकम् फ. 9. इति इत्यधिकम् फ. ह. 10. उज्झतेश्च कर्तरि अ. ड. फ. ह. 11. इति इत्यधिकम् अ.क. ह, कूलानि ड. 12. इति इत्यधिकम् क. ह. 13. उज्झयिता ह. 14. पुष्यतेः सिध्यतेः अ. 15. अर्थाः इत्यधिकम् फ. 16. हलिषु वाच्येषु अ. ह, मुञ्जादिषु अर्थेषु फ. 17. तथा नास्ति अ. 18. तस्मादपि ड.